सदा। यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते”

**दौहित्रायण** पुंस्त्री० दुहितुरपत्यं युवा विदा० अञि अजन्तत्वात् यूनि हरिता० फक्। दुहितुर्यून्यपत्ये।

**द्यविद्यवी** स्त्री दिवसे निरु०।

**द्यावाक्षमा** स्त्री द्वि०व०। द्यौश्च क्षमा च दिवो द्यावादेशः। स्वर्गपृथिव्योः हेमच०। एवं द्यावापृथिवीद्यावाभूमि शब्दावपि तत्रार्थे द्वि०व० “द्यावापृथिवीयम्” शत०ब्रा० ११।५२ द्यावापृथिव्योरिदम् वैश्वदेवं तत्सम्बन्धि इत्यर्थः। “द्यावापृथिवी इह ज्यैष्ठे”शत०१३।५।१।११ “आर्षत्वात् एकवचनान्तता। “द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्त्ता भुवनस्य गोप्ता”अनुमानचिन्तामणिधृतश्रुतिः।

**द्यु** अभिसर्पणे अदा०पर०सक०अनिट्। द्यौति अद्यौषीत्। दुद्याव। “गुहायाः निरगात् बाली सिंहो मृगमिव द्युवन्” भट्टिः।

**द्यु** न० दिव—उन् किच्च वा०वलोपश्च। १दिने २गगने ३स्वर्गे च विश्वः ४अग्नौ पु० मेदि०।

**द्युक्ष** त्रि० दिवि द्युनि क्षयति क्षि—निवासे ड। १स्वर्गलोकवासिनि त्रिका० “द्युक्षो राजा गिरामक्षितोतिः” ऋ०६।२४।१ “द्युक्षो द्युलोक निवासी” भा० २दीप्तियुक्ते च “द्युक्षमर्यमणं भगम्” ऋ०१।१२६।६ “द्युक्षं दीप्तिमन्तम्” भा०।

**द्युग** पुंस्त्री० द्युनि दिवि वा आकाशे गच्छति गम—ड। १पक्षिणि राजनि०। स्त्रियां जातित्वात् ङीष्। २आकाशगामिमात्रे त्रि० स्त्रियां टाप्।

**द्युगण** पु० द्यूनां दिवां वा दिनानां गणः। ग्रहाणां मध्यगतिसाधनाङ्के दिनवृन्दे अहर्गणशब्दे ५७७ पृ०तदानयनादि दृश्यम्। “रविदिनान्तगताधिकमासकैः क्षतदिनैः सहितो द्युगणो विधोः” सि०शि०।

**द्युगत्** न० द्र+गम—क्विप्। शीघ्रे निरु० “अतस्त्वा गीर्भिर्द्युगदिन्द्र!” ऋ० ८।८६।४

**द्युचर** त्रि० दिवि द्युनि वा आकाशे चरति चर—ट। १ग्रहे २पक्षिणि च “द्यौश्चचाल तदा राजन्! द्युचराश्च सहस्रशः” हरिवं० १२२अ०।

**द्युज्या** स्त्री ६त०। द्युवृत्तस्याहोपात्रवृत्तस्य दलरूपायां ज्यायाम्। “क्रान्तेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रमज्यया। हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरम्” सू०सि० “स्पष्टक्रान्तेः क्रमोत्क्रमज्ये द्वे अपि प्रसाध्य तत्र तन्मध्ये क्रान्त्युत्क्रमज्यया त्रिज्या हीना, दिनव्यासदलमहोरात्रवृत्तस्य व्यासार्द्धं द्युज्येत्यर्थः” रङ्ग०। “क्रान्तिज्या भुजः त्रिज्या कर्णस्तद्वर्गान्तरपदमहोरात्रवृत्तस्यार्द्धं सैव द्युज्या” सि०शि० व्याख्यायां प्रमिता०।

**द्युत** दीप्तौ भ्वा०अक०आत्म०सेट्। द्योतते लुदित्त्वात् अङि प०अद्युतत् अद्योतिष्ट। दिद्युते। द्योतनः “अद्युतच्चन्द्रमाभ्रशम्” भट्टिः उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्ते द्योतने। “व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी” माघः। “विद्युद्युते बाडवजातवेदसाम्”माघः २शोभायाञ्च “पद्मैरनन्वीतवधूमुखद्युतः” माघः णिचि द्योतयति प्रकाशने व्यञ्जनावृत्त्या बोधने च द्योत्यार्थः व्यङ्ग्यार्थे

**द्युत्** पु०द्युत—क्विप्। १किरणे हेमच०। २द्योतमाने त्रि० “स हि द्युता विद्युता वेति साम” ऋ०१०।९९।२। “द्युता द्योतमानेन” भा०।

**द्युत** त्रि० द्युत—क। द्योतमाने अद्रवचरति क्विप् द्युतति अद्युतीत्। “द्युतद्यामानं बृहतीमृतेन” ऋ०५।८०।१

**द्युतान** त्रि० द्युत—शानच् वेदे गणव्यत्ययात् शपोलुक्। द्योतनशीले “द्युतानस्त्वा मारुतो मिनोतु” यजु० ५।२७ “द्युतानः दीप्यमानः” वेददी०।

**द्युति** स्त्री द्युत—इन्। १दीप्तौ २शोभायाम् “सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिः” रघुः। “रूपयौवनलालित्य भोगाद्यैरङ्गभूषणम्। शोभा प्रोक्ता सैव कान्तिर्मन्मथाप्यायिता द्युतिः। कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते” सा०द० तत्सामान्यावान्तरभेदकथनेन स्त्रीणां सात्विकालङ्कारतया उक्ते ३अर्थे। “देहजा कान्तिर्द्युतिरित्याचार्य्या मन्यन्ते।

**द्युतित** न०द्युत—भावे क्त वा न गुणः। १दीप्तौ पक्षे गुणः द्योतितमप्यत्र। २कर्तरि क्त। २दीप्तियुते त्रि०।

**द्युतिधर** पु० द्युतिं देहगतां कान्तिं धारयति अन्तर्भूतण्यर्थे धृ—अच्। विष्णौ “तेजो वृषो द्युतिधरः” विष्णुसं० “द्युतिमङ्गगतां कान्तिं धारयन् द्युतिधरः” भा० “ओजस्तेजो द्युतिधरः” विष्णुसं०नामान्तरं तद्व्युत्पत्तिभाष्ये ऽन्यथा दर्शिता यथा “ज्ञानलक्षणां दीप्तिं धारयन् द्युतिधरः” इति। तेनोभयविधयोगार्थवत्त्वात् तस्य नामद्वयमित्यपौनरुक्त्यम्।

**द्युतिमत्** त्रि० द्युतिः प्रशंसायामस्त्यर्थे मतुप्। १प्रशस्तकान्तियुक्ते “यशोतिहासो द्युतिमान्” भा०आ०९९अ० “द्युतिमतां निकरेण महात्मनाम्” किरा०। स्त्रियां ङीप्। स्वायम्भुवस्य मनोः २पुत्रभेदे पु०। तदुपक्रमे “ज्योति-